# Shri Nrisimhamantrah

# શ્રીનૃસિંહમન્ત્રઃ

## Document Information

Text title : Shri Nrisimhamantrah

File name : nRRisiMhamantraH.itx

Category : vishhnu, dashAvatAra, mantra, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 8, 2025

*sanskritdocuments.org*

# શ્રીનૃસિંહમન્ત્રઃ

રામેમુર્વાદીન્ દક્ષિણે શેષગણેશાદીન્ પુરતઃ તમહાટકે મન્ત્રેણ શ્રીનૃસિંહં પ્રણમ્ય-
શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
કર્પૂરધામધવલં કટકાઙ્ગદાદિ છત્રં ત્રિનેત્રશશિશેખરમણ્ડિતાઙ્ગમ્ । વામાઙ્કસંસ્થિતરમાનયનાભિરામં ચક્રાબ્જશઙ્ખસગદં નૃહરિં નમામિ । અથ મન્ત્રરાજાનુષ્ઠાનક્રમઃ કથ્યતે । સ્નાનાદિ નિત્યક્રિયાઃ સમાપ્ય વિવિક્તદેશે સુખાસને સમ્યગુપવિશ્ય ગુરુપરમ્પરાં નત્વા શુદ્ધીભૂત શુદ્ધિપ્રાણપ્રતિષ્ઠામાતૃકાન્યાસયોગપીઠન્યાસાન્તં કૃત્વાઽભદ્રં કર્ણેભિરિતિ શાન્તિ પઠિત્વા સ્વસ્તિ ન ઇતિ ચ પ્રકૃતિપ્રાકૃતાશેષવિશેષા યદ્વિભૂતયઃ પ્રવિશન્તુમમાન્તસ્થે વિષ્ણોશ્ચરણરેણવઃ ॥ ૧॥

શ્રીતાપિનીય શ્રુતિસૂત્રસારસત્સમ્પ્રદાયામલગન્ધશોભાં નિત્યં નૃસિંહસ્ય કરોતુ ।
સૈષા સન્તોષમાનુષ્ટુભ કલ્પમાલા ॥ ૨॥

સકૃચ્છ્રતાપ્યસૌવિધા સદ્યો દહતિ સંસ્તિમ્ ।
તૂલદાહેકિધાનસ્તિ મારઃ કાલાનલાર્ચિષઃ ॥ ૩॥

અસ્યા મહિમસીમાનમવિદિત્વા નિવર્તતે ।
અપ્યૌપનિષદી વાણી પૌરુષેયી તુ કિં પુનઃ ॥ ૪॥

અવર્ષવાસિનામેનાં વદતઃ કુટિલાત્મનામ્ ।
લઙ્ઘયન્તિ નૃસિંહસ્ય દિવ્યામાજ્ઞામવજ્ઞયા ॥ ૫॥

ઇતિ શ્લોકાન્પઠિત્વા પ્રણવશક્તિબીજસમ્પુટિતેન મૂલમન્ત્રેણ પ્રાણાયામત્રયં
કૃત્વા કૃતાઞ્જલીર્ભૂત્વા અસ્ય શ્રીનૃસિંહાનુષ્ટુભમન્ત્રરાજસ્ય વિધિઃ ॥

પ્રજાપતિર્બ્રહ્મા ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । શ્રી ભગવાન્ મઙ્ગલેશ્વરઃ । શ્રીનૃસિંહઃ પરમાત્મા દેવતા । ઇતિ શિરોવદન હૃદયેષુ વિન્યસેત્ । આદ્યા જગન્મૂલા પ્રકૃતિઃ શક્તિઃ । મહાપુરુષ આદ્યં બીજમ્ । બુદ્ધિર્દ્વિતીયા શક્તિઃ । તદુપાધિકપ્રત્યગાત્મા દ્વિતીયં બીજમ્ । અમૃતપૂરણી મધ્યવર્તિની મૂલાધારાદારભ્ય બ્રહ્મરન્ધ્રપર્યન્તા સુષુમ્નાસરસ્વતી કુલદેવી તૃતીયા શક્તિઃ । તત્સહચર ઉદાનો વાયુસ્તૃતીયં બીજમ્ । ઈં ચતુર્થી શક્તિઃ । હં ચતુર્થં બીજમ્ । એવં નાભૌ વિન્યસ્ય । પરબ્રહ્મતત્ત્વં પરમાત્મા ક્ષેત્રમ્ । શુક્લો વર્ણઃ । ઉદાત્તસ્વરઃ ઇત્યુચ્ચાર્ય નૃ ઇત્યેતદ્દૃષ્ટં કીલકં જ્ઞાતમ્ । સત્સિદ્ધિરપ્રતિબન્ધકં સિંહ ઇત્યેદ્દૃષ્ટં કીલકં જ્ઞાતં સત્સર્વસિદ્ધિપ્રદં ઇતિ પાદયોર્વિન્યસેત્

। તથાऋષિં મૂર્ધ્નિ મુખે છન્દો દેવતાં હૃદિ વિન્યસેત્ । આધારે બીજશક્તી ચ કીલકં પાદયોર્ન્યસેત્ । તતઃ નિરતિશયનિરન્તરનૃસિંહપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ પ્રણવશક્તિબીજસમ્પુટિતેન મૂલમન્ત્રેણ કરશુદ્ધિં કુર્યાત્ । પ્રકોષ્ઠે મણિબન્ધે ચ કૂર્પરકરયોસ્તલે તત્પૃષ્ઠે ચ દન્તે ચ કરશુદ્ધિરુદાહૃતા । એવં કરશુદ્ધિ વિધાય પઞ્ચાગન્યાસં કુર્યાત્ । ૐ ઇં હં ઉગ્રમ્ । ૐ પ્લું હં ઇં ૐ અઙ્ગુષ્ઠાભ્યાં નમઃ । હૃદયાય નમઃ । ૐ ઇં હં જ્વલ૦ ખં હં ઇં ૐ તર્જનીભ્યાં નમઃ । શિરસે સ્વાહા । ૐ ઇં હં નૃસિંહ મ ઇં૧ દં ઇં ૐ મધ્યમાભ્યાં નમઃ । શિખાયૈ વષટ્ । ૐ ઇં હં મૃત્યુ૦ હં હં ઇં ૐ અનામિકાભ્યાં નમઃ । કવચાય હું । ૐ ઇં હં ઉગ્રં૦ ભ્યહં હં ઇં ૐ કનિષ્ઠિકાભ્યાં નમઃ । વૌષટ્ । અસ્ત્રાય ફટ્ । તતઃ પ્રણવશક્તિબીજસમ્પુટિતેન મૂલેન વ્યાપકત્રયં કુર્યાત્ ॥

અથાક્ષરં ન્યાસં કુર્યાત્ । શિરોલલાટનેત્રદ્વયમુખ દોઃ પઞ્ચસન્ધ્યગ્રકટિદ્વયગુહ્યનાભિ હૃદયગલાધરગલેષુ ૐ ઉં ૐ ૐ ગ્રં ૐ ઇત્યાદિ પ્રણવસમ્પુટિતાન્યક્ષરાણિ ન્યસેત્ । અથ દ્વાદશવિધિન્યાસં કુર્યાત્ તદ્યથા પ્રણવશક્તિબીજાનિ પ્રણવસમ્પુટિતાનિ । નમો તાનિ સબિન્દુકાનિ ચ દક્ષિણતર્જનીમારભ્ય વામતર્જનીપર્યન્તં દ્વાત્રિંશરેખાસુ વિન્યસ્ય વામાઙ્ગુષ્ઠરેખાત્રયેષુ । બીજશક્તિપ્રણવાન્ પ્રણવસમ્પુટિતાનિ નમો તાનિ વિન્યસેત્ । વામકરતલે મેણ્ઢે મૂલાધારે ઉર્વોઃ જાન્વોઃ જઙ્ઘયોઃ પાર્શ્વયોસ્તદઙ્ગુલીષુ । હં ઇં ૐ ૐ હં ૐ નમઃ । રક્તાસ્થિમજ્જાસુ । અથદ્વયક્ષરન્યાસઃ । પાદાદિ મૂર્ધ્નિપર્યન્તં ૐ ૐ ઇં હં ૐ ઉગ્રં ૐ નમઃ ૐ વીરં ૐ નમઃ । પાદયોઃ એવં સર્વત્ર ઊર્વોઃ કટ્યાં નાભ્યાં હૃદિ બાહ્વોઃ કણ્ઠે ચુબુકે ઓષ્ઠયોઃ ગણ્ડયોઃ કર્ણયોઃ આસ્યે નાસિકયોઃ નેત્રયોઃ ૐ મ્યહં હં ઇં ૐ ૐ નમઃ મૂર્ધ્નિ । અથ પાદન્યાસઃ । મુખાદિ પાદપર્યન્ત ૐ ઇં હં ૐ ઉગ્રં ૐ નમઃ મુખે મૂર્ધ્નિ નાસિકાયાં નેત્રયોઃ શ્રોત્રયોઃ વદને હૃદયે નાભ્યાં કટ્ટ્યાં જાન્વોઃ ૐ અહં હં ઇં ૐ ૐ નમઃ પાદયોઃ ॥

અથ ચતુરક્ષરન્યાસઃ । નાસિકાદિપાદપર્યન્તં ૐ ૐ ઇં હં ૐ ઉગ્રં વીરં ૐ નમઃ । નાસિકાનયનયોઃ શ્રવણયોઃ નાભૌ હૃદિ મૂર્ધ્નિ બાહ્વોઃ ૐ નમામ્યહં હં ઇં ૐ નમઃ પાદયોઃ । અથ પાદન્યાસઃ । ૐ ૐ ઇં હં ઉગ્રં વિષ્ણું ૐ નમઃ મૂર્ધ્નિ । જ્વલં ૐ નમઃ હૃદિ । નૃસિંહં ઇં ૐ નમઃ નાભૌ ૐ મૃત્યુ મ્યહં હં ઇં ૐ ૐ નમઃ સર્વાઙ્ગેષુ । અથાર્ધન્યાસઃ । ૐ ઇં હં ઉગ્રં મુખં ૐ નમઃ મૂર્ધાદિહૃદયપર્યન્તં ૐ નૃસિંહ મ્યહં હં ઇં ૐ ૐ નમઃ । હૃદયાદિપાદપર્યન્તં અથોગ્રન્યાસઃ । મુખાદિપાદપર્યન્તં ૐ ૐ ઇં હં ઉગ્રં ઉગ્રં નમામ્યહં ૐ નમઃ મુખે । ૐ વીરં ઉગ્રં નમામ્યહં ૐ નમઃ શિરસિ ઇત્યાદિ ઘ્રાણયોઃ ચક્ષુષોઃ શ્રોતયોઃ કેસરસ્થાનેષુ હૃદયે નાભૌ । ૐ મૃત્યુમૃત્યું ઉગ્રં નમામ્યહં હં હં ઇં ૐ કટ્યાદિપાદપર્યન્તમ્ । અથ વીરન્યાસઃ । અસ્ય ન્યાસસ્ય પૂર્વવદેવ મુખાદિસ્થાનાનિ ૐ ઇં હં ઉગ્રં વીરં નમામ્યહમ્ । મુખે ૐ વીરં વીરં ૐ નમઃ । નમામ્યહં ૐ નમઃ શિરસિ ઘ્રાણયોશ્ચ ચક્ષુષોઃ શ્રોતયોઃ કેસરસ્થાનેષુ હૃદયે નાભૌ મૃત્યુમૃત્યું વીરં નમામ્યહં હં ઇં ૐ નમઃ કટ્યાદિપાદપર્યન્તમ્ । અથ સિંહન્યાસઃ । ૐ ઇં હં ઉગ્રસિંહં નમામ્યહં ૐ નમઃ મુખે ૐ વીરં સિંહં નમામ્યહં શિરસિ ઘ્રાણયોશ્ચક્ષુષોઃ શ્રોતયોઃ કેસરસ્થાનેષુ હૃદયે નાભૌ ૐ મૃત્યુમૃત્યું સિંહં નમામ્યહમ્ ॥

હં ઇં ૐ ૐ નમઃ કટ્યાદિપાદપર્યન્તં વિન્યસેત્ । ઇતિ દશવિધન્યાસઃ । અથ હરિન્યાસઃ । ૐ ૐ ઇં હં ૐ ૐ નમઃ મૂલાધારે ૐ ગ્રં ૐ નમઃ સ્વાધિષ્ઠાને ૐ વીં ૐ નમઃ તદુપરિ મણિપૂરકે તદાહિ મહાવિષ્ણું અનાહતપર્યન્તં તદાહિ જ્વલન્તં વિશુદ્ધપર્યન્તં સર્વતો ભ્રૂમધ્યાજ્ઞાપર્યન્તં મુખં નૃ નેત્રયોઃ સિંહં મૂર્ધ્નિ ભીષણં ભદ્રં દક્ષિણહસ્તે મૃત્યુમૃત્યું વામહસ્તે માં દક્ષિણપાદેભ્ય વામપાદે હં હં ઇં ૐ ૐ નમઃ । ઇત્થં સવર્ણમૂર્ધાદિ પાદપર્યન્તં ન્યસેત્ । અસ્ય હરિન્યાસસ્ય સાક્ષાદ્ધરિસારૂપ્યાદિ પ્રાપકસ્ય માહાત્મ્યં હરિરેવ જાનાતિ । મનુષ્યો વક્તું ન સમર્થઃ ॥

અથ પઞ્ચતત્ત્વન્યાસઃ । ૐ ઈં હં ઉગ્રં વિષ્ણું ૠક્ પૃથિવ્યાત્મને નમઃ । પાદયોઃ ૐ જ્વલન્તં સર્વતોમુખં યજુરગ્ન્યાત્મને નમઃ ગુહ્યે ૐ નૃસિંહં સામાત્મને નમઃ હૃદયે । ૐ મૃત્યુમૃત્યું હં હં ઈં ૐ અથર્વાગિરસવામ્બાત્મને નમઃ મુખે ૐ ઈં હં ઉગ્રં વિષ્ણું મહાવિષ્ણું જ્વલન્તં સર્વતોમુખમ્ । નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહમ્ । હં ઈં ૐ સમસ્ત ઇતિહાસાભ્યાં પ્રણવાકાશાત્મને નમઃ શિરસિ । ઉગ્રનૃસિંહાય નમઃ । ક્ષ્રૌં નૃસિંહાય નમઃ । વીર નૃસિંહાય નમઃ । વિડમ્બન નૃસિંહાય નમઃ । કોપ નૃસિંહાય નમઃ । શિરોમુખ હૃદયેનાભિપાદેષુ વિન્યસેત્ ॥

અં આત્મતત્ત્વેશ્વરાય પાદયોઃ ઉં વિતત્ત્વેશ્વરાય ગુહ્યે મં શિવતત્ત્વેશ્વરાય નાભૌ ૐ સર્વતત્ત્વેશ્વરાય નાભ્યાદિપાદપર્યન્તં વ્યાપકરૂપેણ વિન્યસેત્ । અં આત્મતત્ત્વેત્યાદિમન્ત્રત્રયમુક્ત્વા હૃદયમુખશિરસ્સુ વિન્યસ્ય ૐ સર્વતત્ત્વેશ્વરાય નમઃ મૂર્ધ્નિપર્યન્તં વ્યાપકરૂપેણ વિન્યસેત્ । અં આત્મતત્ત્વેત્યાદિ પુનર્મન્ત્રત્રયેણ પાદહૃદયશિરસ્સુ વિન્યસ્ય ૐ સર્વતત્ત્વેશ્વરાય નમ ઇતિ સર્વાઙ્ગવ્યાપકં કુર્યાત્ ॥

પુનઃ પૂર્વવત્ વ્યાપકત્રયં કુર્યાત્ ।
ૐ ઈં હં અં ઉગ્રં વિષ્ણું અં શુક્લવર્ણાય આનન્દાત્મને હૃદયાય નમઃ ૐ જ્વલન્તં સર્વતોમુખં ૐ હ્રીં ઘૃણિઃ સૂર્યાદિત્યઃ શ્રીં ઉં શુક્લવર્ણાય ક્રિયાત્મને શિરસે સ્વાહા । મં નૃસિં ઇં ૐ ભૂર્લક્ષ્મીર્ભુવર્લક્ષ્મીઃ સુવઃ કાલકર્ણી તન્નો મહાલક્ષ્મીઃ પ્રચોદયાત્ । મં પિઙ્ગલવર્ણાય જ્યોતિરાત્મને શિખાયૈ વષટ્ ૐ મૃત્યુમૃત્યું નમામ્યહં ૐ નૃસિંહાય વિદ્મહે વજ્રનખાય ધીમહિ તન્નઃ સિંહઃ પ્રચોદયાત્ । હં ઈં ૐ ૐ હેમવર્ણાય માયાત્મને કવચાય હુમ્ । ૐ ઈં હં ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતોમુખં નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહં હં હં ઈં ૐ સર્વવેદાત્મને વિદ્યુદ્વર્ણાય મહાચક્રાત્મને અસ્ત્રાય ફટ્ । ૐ ભૂર્ભુવઃ સ્વઃ ઇતિ દિગ્બન્ધઃ । સત્યજ્ઞાનેતિ એતત્ શ્લોકોક્તલક્ષણઃ શ્રીનૃસિંહઃ સ્વયં ભૂત્વા લં પૃથિવીત્યાદિ પઞ્ચોપચારપૂજાં કૃત્વા મૂલં દ્વાદશવારં જપિત્વા દ્વિસ્વરસામ્ના વ્યાપકત્રયં કુર્યાત્ ॥

અત્ર ઉદાતાનુદાત્તાભ્યાં અક્ષરાણાં દ્વન્દ્વશઃ ગાનં તર્જન્યગ્રેણાઙ્ગુષ્ઠમૂલ પર્વ સ્પૃશન્ અઙ્ગુષ્ઠાન્તપર્વોગ્ચ્છ્રાયેણ ઉદાત્તં ગાયેત્ । અઙ્ગુષ્ઠાગ્રેણ કનિષ્ઠિકાગ્રતન્મૂલપર્વન્નનુદાત્તં ગાયેત્ । અઉમ ૐ ઇતિ પ્રણવસ્ય દ્વિરાવૃત્યા અષ્ટમાત્રત્વં સમ્પાદ્ય ગાયેત્ । માત્રાશબ્દેન વર્ણ ઉચ્યતે । અ ઉ ઉદાત્તેન મ ૐ અનુદાત્તેન ગીતિમાત્રાસઙ્ખ્યા ૩૪૫ અ ઉ પુનરુદાત્તેન મ ૐ પુનરનુદાત્તેન સર્વ ગાને તિસ્ત્રઃશ્ચ તસ્ત્ર પઞ્ચ વા માત્રા ભવન્તિ એવં શક્તિબીજયોરપિ ચતુર્ગુણેનાષ્ટમાત્રત્વં સમ્પાદ્ય ગાયેત્ । ઈં હાં ઈં હાં ઇતિ ॥

તથૈવપ્રથમપાદં તદઙ્ગપ્રણવં ચ પ્રગાય દ્વિતીયપાદં ગીત્વા સૌરસાવિત્રી સામરહિતાં પઠિત્વા તૃતીયપાદં ચ પ્રગાયજુર્લક્ષ્મીં સામરહિતાં પઠેત્ । સૌરસાવિત્રી યજુલક્ષ્મયોર્ન ગાનમિતિ સમ્પ્રદાયઃ । તતશ્ચતુર્થપાદં નૃસિંહગાયત્રી ચ પ્રગાથમિશ્રેણ સામ ગાયેત્ । દ્વિગુણીકૃતયોઃ શક્તિબીજયોઃ પ્રણવસ્ય ચૈકૈકાં માત્રાં મિશ્રીકૃત્ય ગાયેત્ । ઈમાહમૂ ઈમાહમૂ એવં દ્વિસ્વરસામ ત્રિવારં પ્રગાય વ્યાપકત્રયં કુર્યાત્ । ઉગ્રં વીરં મહાવિષ્ણું અ ઉ મ ૐ અ ઉ મ ૐ ઇત્યાદિ પ્રકાશે ગાનસ્ય જ્ઞેયઃ । ઇદમાનુષ્ટુભસામ અનેનાનુષ્ટભસામ્ના શ્રીલક્ષ્મીનૃસિંહાત્મનો મમ દેહે વ્યાપકન્યાસઃ સમ્પાદ્યતાં લક્ષ્મીનૃસિંહાહં બ્રહ્માસ્મીતિ વ્યાપકસામાન્તે પઠેત્ ॥

અથ ષટ્સ્વરસામ્ના પાદશોઙ્ગં ન્યાસં કુર્યાત્ । ઉદાત્તમાદ્યદ્વયમત્ર ગીત્વા નીચૈસ્તૃતીયં ચતુરીયપઞ્ચમૌ

મધ્યસ્વરેણૈવ તથૈવેતિ પાદપૂરણે તથૈવ ષષ્ઠેરુચ્ચૈરમુચ્ચૈર્મનુમષ્ટમં ચ । ઇતિ ષટ્સ્વર સામગાન પ્રકારઃ । અત્ર પ્રણવસ્ય દ્વિરાવૃત્ત્યા અષ્ટમાત્રાસુ અ ઉ મ્ ૐ મ્ અમધ્યમસ્વરેણ ઉ મ્ ૐ મ્ ષટ્સ્વરગાનકાલે દીર્ઘાક્ષરાણિ વામહસ્તાઙ્ગુલિભિઃ ગૃહ્ણીયાત્ । તર્જનીમધ્યમાનામિકાકનિષ્ઠિકાનાં મધ્યમપર્વાણિ વક્રાઙ્ગુષ્ઠાગ્રતઃ સ્પૃશન્નુદાત્તોપક્રમેણોત્તરોત્તરં અનુદાત્તં શનૈર્ગાયેત્ । અયમેવ મધ્યમસ્વરઃ કર્ષણાખ્યઃ એવં શક્તિબીજે પ્રથમપાદં તદન્તે અઙ્ગપ્રણવં ચ ગીત્વા ઈં હાં ઈં હાં ઈં હાં ઈં હાં ઉગ્રં વીરં મહા વિષ્ણું અ ઉ મ ૐ અ ઉ મ ૐ મ્ સસાગરાં સપર્વતાં સસપ્તદ્વીપાં વસુન્ધરાં અગ્નિર્વૈર્દેવા ઇદં સર્વં વિશ્વાભૂતાનિ પ્રાણા વૈ ઇન્દ્રિયાણિ પશવોન્નમમૃતં સંરાટ્ સ્વરાટ્ વિરાટ્ તસ્ય હ વૈ પ્રણવસ્ય યા પૂર્વા માત્રા પૃથિવ્યકારઃ સ ઋગ્ભિરઋગ્વેદો બ્રહ્મા વસવો ગાયત્રી ગાર્હપત્યઃ સોયમાત્મા ચ તુષ્યાજ્જાગરિત સ્થાનો બહિઃ પ્રાજ્ઞઃ સપ્તાઙ્ગ એકોનવિંશતિમુખઃ સ્થૂલભુગ્વૈશ્વાનરઃ પ્રથમઃ પાદઃ ઇતિ વાક્યચતુષ્ટયં પઠિત્વા ૐ ઈં હં અં ઉગ્રં વીરં મહાવિષ્ણુમ્ । અં શુક્લવર્ણાયાનન્દાત્મને હૃદયાય નમઃ ॥

તતો દ્વિતીયં પાદં પ્રગાય જ્વલન્તં સર્વતોમુખમ્ । ૐ હ્રીં ઘૃણિઃ સૂર્ય આદિત્યઃ શ્રીં શ્રિયલક્ષ્મી ઔપલામમ્બિકાઙ્ગાં ષષ્ઠીં ચ યામિન્દ્રસેનેત્યપ્યાહુઃ । તાં વિદ્યાં બ્રહ્મયોનિં સરૂપામિહાયુષે શરણમહં પ્રપદ્યે ઇતિ વાક્યદ્વયં પઠિત્વા શ્રિયાદિ સપ્તશક્તિભિઃ કનકલશૈરમૃતમાનીયાભિષિચ્યમાનમાત્માનં નૃસિંહં ધ્યાયેત્ । સ્વશિરસિ લક્ષ્મીમુદ્રાં ચ પ્રદર્શયેત્ । યક્ષગન્ધર્વાપ્સરોગણસેવિતમન્તરિક્ષં ઋગ્યજુઃસામાથર્વરૂપઃ સૂર્યોતરાદિત્યેહિરણ્મયઃ પુરુષઃ દ્વિતીયાન્તરિક્ષં સ ઉકારઃ સયજુર્ભિર્યજુર્વેદો વિષ્ણુરુદ્રાત્રિષ્ટુપ્ દક્ષિણાગ્નિઃ સ્વ પ્રસ્થાનોન્તઃ પ્રજ્ઞઃ સપ્તાઙ્ગએકોનવિંશતિમુખઃ પ્રવિવિક્તમુક્તૈજસો દ્વિતીયઃ પાદઃ । ઉં જ્વલન્તં સર્વતોમુખં ૐ હ્રીં ઘૃણિઃ સૂર્યાદિત્યઃ શ્રીં ઉં કૃષ્ણવર્ણાય પ્રિયાત્મને શિરસે સ્વાહા ॥

તતસ્તૃતીયં પાદં પ્રગાય નૃસિંહં ભીષણં ભદ્રં ૐ ભૂરિત્યાદિ યજુર્લક્ષ્મીં પઠિત્વા વસુરાદિત્યૈઃ સર્વૈર્દેવૈઃ સેવિતં દિવં ય ઓષધીનાં પ્રભવતિ તારાપતિઃ સોમઃ તૃતીયા દ્યૌઃ સમકારઃ સ સામભિઃ સામવેદો રુદ્રાદિત્યાઃ જગત્યાહવનીયઃ યત્ર સુપ્તોનકઞ્ચનકામં કામયતે ન કઞ્ચન સ્વ પ્રપશ્યતિ તત્સુષુપ્તં સુષુપ્તસ્થાનએકીભૂતઃ પ્રજ્ઞાનઘન એવાનન્દમયો સ્વાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયઃ પાદઃ એષ સર્વેશ્વર એષ સર્વજ્ઞ એષોતર્યામ્યેષયોનિઃ સર્વસ્ય પ્રભાવાપ્યયૌ હિ ભૂતાનામ્ । મં નૃસિંહં ભીષણં ભદ્રં ૐ ભૂર્લક્ષ્મીઃ ભુવર્લક્ષ્મીઃ સુવઃ કાલકર્ણ કાલકર્ણ । તન્નો મહાલક્ષ્મીઃ પ્રચોદયાત્ । મં પિઙ્ગલવર્ણાય જ્યોતિરાત્મને શિખાયૈ વષટ્ ॥

તતશ્ચતુર્થપાદં પ્રગાય । મૃત્યુમૃત્યું નમામ્યહં નૃસિંહગાયત્રીં ચ પ્રગાય । ૐ નૃસિંહાય વિદ્મહે વજ્રનખાય ધીમહિ તન્નઃ સિંહઃ પ્રચોદયાત્ । મિશ્રણં ચ પ્રગાય ઈ મા હા ભૂ ઈ મા હા ભૂ બ્રહ્મસ્વરૂપં નિરઞ્જનં પરમવ્યોમ્નિકં સબ્રહ્મા સશિવઃ સહરિઃ સેન્દ્રઃ સોક્ષરઃ પરમસ્વરાટ્ યાવસાનેસ્ય ચતુર્થ્યર્ધમાત્રા સા સોમલોક ઓઙ્કારઃ સા અથર્વણૈર્મન્ત્રૈરથર્વવેદઃ સંવર્તકોગ્નિર્મરુતો વિરાડેકઋષિર્ભાસ્વતી સ્મૃતા । ન વહિ પ્રજ્ઞં નાન્તઃ પ્રજ્ઞં નોભયતઃ પ્રજ્ઞં ન પ્રજ્ઞં ના પ્રજ્ઞં ન પ્રજ્ઞાનઘનં અદૃષ્ટમવ્યવહાર્ય મગ્રાત્મલક્ષણ મચિત્યમવ્યપદેશ્યમેકાત્મપ્રત્યયસારં પ્રપઞ્ચોપશમં શિવમદ્વૈતં ચતુર્થં મન્યતે સ આત્મા સવિજ્ઞેયઃ । ૐ મૃત્યુમૃત્યું નમામ્યહં ૐ નૃસિંહાય ધીમહિ તન્નઃ સિંહઃ પ્રચોદયાત્ । હં ઈં ૐ ૐ હેમવર્ણાય માયાત્મને કવચાય હુમ્ । અથ પઞ્ચમં મહાચક્રાખ્યમ્મસ્ત્રમુચ્યતે । ષટ્સ્વરસામ્નૈવ પ્રણવં શક્તિબીજં ચ પ્રગાય પ્રથમપાદં ગીત્વા તદઙ્ગપ્રણવં ચ પ્રગાય દ્વિતીયપાદં ગીત્વા સૌરસાવિત્રીં સમરહિતં પઠેત્ । તતસ્તૃતીયપાદં ગીત્વા યજુલક્ષ્મીં સામરહિતાં પઠેત્ ॥

તતશ્ચતુર્થપાદં નૃસિંહગાયત્રી ચ પ્રગાય મિશ્રણસામં ગાયેત્ । ચત્વારો વેદાઃ સાઙ્ગાઃ સશાખાઃ ચત્વારઃ પાદા ભવન્તિ પ્રણવં સર્વં પઞ્ચમં ભવતિ ષડરં વા એતત્સુદર્શનં મહાચક્રં તસ્માત્ષડરં ભવતિ ષટ્પત્રં ચક્રં ભવતિ ષડ્ વા ઋતવ ઋતુભિઃ સમિતમ્ । ભવતિ મધ્યે નાભિર્ભવતિ નાભ્યાં વા એતે અરાઃ પ્રતિષ્ઠિતાઃ । મા યથા વા એતત્સર્વં વેષ્ટિતં ભવતિ નાત્માનં માયા સ્પૃશતિ તસ્માદ્યથા બહિર્વેષ્ટિતં ભવતિ અથાષ્ટારમષ્ટપત્રં ચક્રં ભવતિ ઋચો અક્ષરે પરમે વ્યોમન્યસ્મિન્દેવા અધિવિશ્વેનિષેદુઃ યસ્તં ન વેદ કિમૃચા કરિષ્યતિ ય એતદ્વિદુસ્ત ઇમે સમાસતે ॥

ઇતિ એતત્સર્વં પઠિત્વા સ્વશરીરં બ્રહ્માણ્ડં ભાવયિત્વા શરીરમધ્યે નાભિ ધ્યાત્વા તસ્મિન્ક્ષીરસાગરં ધ્યાત્વા શ્વેતદ્વીપં ચ ધ્યાત્વા શેષપર્યઙ્કે પ્રણવં વિચિન્ત્ય નૃસિંહૈકા ક્ષરં વિચિત્ય ૐ રૌં ૐ સહસ્રાર હું ફટ્ ૐ નમો નારાયણાય ૐ નમો ભગવતે વાસુદેવાય અં આં અં અ ૐ ૐ ૐ ગ્રં ૐ મ્યં ૐ ૐ હં ૐ એવં સર્વત્ર ક ખં ગં જઃ વસૂનાં સ્થાનાનિ । સં જં દં ધં રુદ્રાણાં સ્થાનાનિ નં ઘં શં ષં આદિત્ય સ્થાનાનિ સં હં લં ક્ષં વિશ્વેદેવાનાં સ્થાનાનિ ૐ ઉં મં બ્રહ્મવિષ્ણુમહેશ્વરાણાં સ્થાનાનિ હં સં સૂર્યાચન્દ્રમસોઃ સ્થાને ૐ ઈં હં ઉગ્રં -મ્યહં હં ઈં ૐ સર્વવેદાત્મને વિદ્યુદ્વર્ણાય મહાચક્રાત્મને અસ્રાય ફટ્ । પ્રાણપ્રતિષ્ઠા પુષ્પાઞ્જલી ચ કુર્યાત્ । ક્ષ્રૌં ઇત્યાદિશતક ધ્યાનં એવં પઞ્ચાઙ્ગં વિધાય ઉદ્ધારાક્ષરપદપાદ ક્ષીરોદાર્ણવબ્રહ્માધિપતિ સામાનિ ગાયેત્ ॥

તત્ર મૂલમન્ત્રપાદાનાં આદ્યૈરક્ષરદ્વયૈરાદ્યપાદં દ્વિતીયૈર્દ્વિતીયં તૃતીયૈસ્તૃતીયં ચતુર્થૈશ્ચતુર્થં ઇત્યેવમુદ્ધૃત્ય પાદશઃ પ્રગેયાનિ । અથોદ્ધારસામ । ૐ ઈં હં ઉગ્રં જ્વલં નૃસિમ્મૃત્યું વીરં તં સં હં ભી મૃત્યું મહાર્વતોષેણ નમો વિષ્ણું મુખં મ ઈં મ્ય હં ઇત્યુધૃત્ય પાદશઃ પ્લુતેન ગીત્વા મિશ્રણં ચ ગાયેત્ । ઈં માં હં મૂં ઈં માં હં મૂ ઉદ્ધરિસામા ઘં તં દ્વિસ્વરસામ્ના પાદશો ગેયમ્ । અથ વર્ણસામમૂલમન્ત્રાક્ષરાણિ પ્રણવસમ્પુટિતા એકમુદાત્તેન એકમનુદાત્તેન ક્રમેણ ગાયેત્ । યથા પ્રણવં શક્તિબીજં ચ પ્રગાય ૐ ઉં ૐ ૐ ગ્રં ૐ એવં સર્વત્ર મિશ્રણં ગાયેત્ । યદ્વા એકપદસ્યાક્ષરાણિ પ્રત્યેકમુદાત્તેન એકપદસ્યાક્ષરાણિ પ્રત્યેકમનુદાત્તક્રમેણ ગાયેત્. ઉગ્રં વીરં એવં સર્વત્ર મિશ્રણં ચ ગાયેત્ । અનયોર્વર્ણસામ્નોઃ પ્રણવસમ્પુટિતત્વેનૈવાક્ષરાણાં ગાનમ્ । સમ્પુટિતપ્રણવયોરુચ્ચારણમાત્રમિતિ સમ્પ્રદાયઃ ॥

અથ પદસામ । એક પદમુદાત્તેન એકમનુદાત્તેન દ્વિસ્વરેણ ગાયેન્ત્ । પ્રણવં શક્તિબીજં ચ પ્રગાય ઉગ્રં વીરમ્ । મહાવિષ્ણુમ્ । જ્વલન્તમ્ । સર્વતોમુખમ્ । નૃસિંહમ્ । ભીષણમ્ । ભદ્રમ્ । મૃત્યુમૃત્યુમ્ । નમામિ । અહમ્ । ઇત્યેકાદશપદાનિ મિશ્રણં ચ ગાયેત્ । અથ પાદસામ । પ્રણવં શક્તિબીજં ચ પ્રગાય પાદચતુષ્ટયં ગીત્વા મિશ્રણં ચ પ્રગાયેત્ । અથ ક્ષીરોદાર્ણવ સામ । ૐ ઈં હં ક્ષીરો । દાર્ણ । વશા । યિનમ્ । નૃકે । સરિમ્ । યોતિ । ધ્યેયમ્ । પરમમ્ । પદમ્ । તતો મિશ્રણમ્ । અત્ર પરમમિત્યક્ષરત્રયોપરિગાનમ્ ॥

અથ બ્રહ્માધિપતિસામ પ્રણવશક્તિબીજાન્યુચ્ચાર્ય બ્રહ્માધિપતિસામ દ્વન્દ્વશો ગાયેત્ । બ્રહ્મા । ધિપ । તિબ્ર । હ્મણો । ધિપ । તિઃ । તિરિત્યેકાક્ષરસ્યૈવમાનમ્ । મિશ્રણં ચ ગાયેત્ । ઉદ્ધારક્ષોરોદ બ્રહ્માધિપતિ સામાદૌ પ્રણવશક્તિઃ । બીજાનાં ન ગાનમ્ । અન્યત્રાસ્તીતિ સમ્પ્રદાયઃ । સર્વેષુ સામસ્વન્તે મિશ્રણમસ્તિ । ઉદ્ધારપદપાદ ક્ષીરોદ બ્રહ્માધિપતિ સામાનિ પઞ્ચશ્રુતિ પ્રસિદ્ધાનિ । પુનઃ સમ્પ્રદાયાદ્વ્ય ક્ષરસામની ચેતિ સપ્તસામાનિ ગીત્વા

ઋતં સત્યં સચ્ચિદાનન્દં ક્ષીરોદાર્ણવેતિ વાક્યત્રયં પઠિત્વા ૐ ઈં હં ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતોમુખમ્ । નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહમ્ । હ ઈં ૐ ક્ષીરોદાર્ણવશાયિને નૃસિંહાય યોગિધ્યેયાય પરમાત્મને શેષપર્યઙ્કોપરિ ઉપવિષ્ટાય ચક્રપિનાકાભયવરદહસ્તાય શ્રીનૃસિંહાત્મને નમઃ । ઇતિ મૂલનૃસિંહં ગૃહપુષ્પાઞ્જલિં કૃત્વા રૌં નૃસિંહાત્મને નમઃ । પુષ્પાઞ્જલિ કૃત્વા સંહસ્ત્રાંરં હું ફટ્ । સુદર્શનમૂર્તિભ્યો નમઃ ૐ નં મોં નાં રાં યં ણાં યં નારાયણમૂર્તિભ્યો નમઃ ૐ નં મોં ભઙ્ગવન્તેં વાસુદેવાયં વાસુદેવમૂર્તિભ્યો નમઃ ૐ સ્વરાધિષ્ઠાત્ર્યૈ દેવતાયૈ કેશવમૂર્તયે નમઃ ॥

એવં સર્વત્ર આં નારાયણમૂર્તયે નમઃ ઈં માધવમૂર્તયે ઈં ગોવિન્દમૂર્તયે ઉં વિષ્ણુમૂર્તયે ૐ મધુસુદનમૂર્તયે ઋ ત્રિવિક્રમમૂર્તયે ૠ વામનમૂર્તયે લૂં શ્રીધરમૂર્તયે લૂં હૃષીકેશવમૂર્તયે એં પદ્મનાભમૂર્તયે ઐં દામોદરમૂર્તયે ૐ વાસુદેવમૂર્તયે ૐ સઙ્કર્ષણમૂર્તયે અં પ્રદ્યુમ્નમૂર્તયે અ અનિરુદ્ધમૂર્તયે નમઃ ॥

અથ બ્રહ્માદિદ્વાત્રિંવ્યૂહાન્ વિચિન્ત્ય
ૐ ઉં ૐ બ્રહ્મણે શ્રીનૃસિંહાય નમઃ ।
ૐ ગ્રં ૐ વિષ્ણવેશ્રી નમઃ ।
ૐ વીં ૐ મહેશ્વરાય શ્રીનૃસિંહાય નમઃ ।
ૐ રં ૐ પુરુષાય શ્રીનૃસિંહાય નમઃ ।
ૐ મં ૐ ઈશ્વરાય શ્રીનૃસિંહાય નમઃ ।
ૐ હાં ૐ સરસ્વત્યૈ શ્રીનૃસિંહાય નમઃ ।
ૐ વ્રીં ૐ શ્રીયૈશ્રીનૃસિંહાય નમઃ ।
ૐ ષ્ણું ૐ ગૌર્યૈ શ્રીનૃસિંહાય નમઃ ।
ૐ જ્વં ૐ પ્રકૃત્યૈશ્રીનૃસિંહાય નમઃ ।
ૐ લં ૐ વિદ્યાયૈ શ્રીનૃસિંહાય નમઃ ।
ૐ તં ૐ ઓઙ્કારાયશ્રીનૃસિંહાય નમઃ ।
ૐ સં ૐ ચતસૃભ્યઃ અર્યમાભ્યઃ ત્રાં ૐ શ્રીનૃસિંહાય નમઃ ।
ૐ વેં ૐ વેદેભ્યઃ સાઙ્ગેભ્યઃ સશાખેભ્યઃ શ્રીનૃસિંહાય નમઃ ।
ૐ તોં ૐ પઞ્ચાગ્નિભ્યઃ શ્રીશ્રીનૃસિંહાય નમઃ ।
ૐ ભું ૐ સપ્તમહાવ્યાહૃતીભ્યઃ શ્રીનૃસિંહાય નમઃ ।
ૐ ખં ૐ અષ્ટભ્યોલોકપાલેભ્યઃ શ્રીનૃસિંહાય નમઃ ।
ૐ નં ૐ અષ્ટભ્યો વસુભ્યઃ શ્રીનૃસિંહાય નમઃ ।
ૐ સિં ૐ રુદ્રેભ્યઃ શ્રીનૃસિંહાય નમઃ ।
ૐ હં ૐ આદિત્યેભ્યઃ શ્રીનૃસિંહાય નમઃ ।
ૐ તીં ૐ અષ્ટભ્યો ગ્રહેભ્યઃ શ્રીનૃસિંહાય નમઃ ।
ૐ ષં ૐ પઞ્ચમહાભૂતેભ્યઃ શ્રીનૃસિંહાય નમઃ ।

ॐ ણં ॐ કાલાય શ્રી ॐ મં ॐ મનવે શ્રી ॐ ઇં ॐ મૃત્યવે શ્રીનૃસિંહાય નમઃ ।
ॐ મૃં ॐ યમાય શ્રીનૃસિંહાય નમઃ ।
ॐ ત્યું ॐ અન્તકાય શ્રીનૃસિંહાય નમઃ ।
ॐ મૃં ॐ પ્રાણાય શ્રીનૃસિંહાય નમઃ ।
ॐ ત્યું ॐ સૂર્યાયશ્રીનૃસિંહાય નમઃ ।
ॐ નં ॐ સોમાય શ્રીનૃસિંહાય નમઃ ।
ॐ માં ॐ વિરાટ્પુરુષાય શ્રીનૃસિંહાય નમઃ ।
ॐ મ્યં ॐ જીવાય શ્રીનૃસિંહાય નમઃ ।
ॐ હં ॐ સર્વસ્મૈ શ્રીનૃસિંહાય નમઃ ।
ॐ શ્રીનૃસિંહાય નમઃ । શ્રીનૃસિંહાય નમઃ ।
કં ખં જં અષ્ટભ્યો વસુભ્યો નમઃ ।
ઝં ત્રં ઘં એકાદશરુદ્રેભ્યો નમઃ ।
નં પં યં શં ષં દ્વાદશાદિત્યેભ્યો નમઃ ।
સં હં લં ક્ષં સં હં લં ક્ષં અષ્ટભ્યો વિશ્વેભ્યો દેવેભ્યો નમઃ ।
ॐ (અં) બ્રહ્મણે નમઃ । ઉં વિષ્ણવે નમઃ । મં મહેશ્વરાય નમઃ । હં સૂર્યાય નમઃ । સં સોમાય નમઃ ।

અથ પદપાદ મહોપાસનાનિ કુર્યાત્ । મૂલમન્ત્રસ્યૈકાદશ પદાનિ પ્રણવશક્તિબીજપૂર્વકાણિ એકૈકશ અર્થાનુસન્ધાનપૂર્વકં પઠેત્ । ॐ ઇં હં ઉગ્રં નૃસિંહં આત્માનં નમામ્યહં એવં સર્વેષુ પદેષુ નૃસિંહમિત્યત્રસ્થાત્મબન્ધહરં નૃસિંહમાત્માનં નમામ્યહમ્ । નમામીત્યત્ર સર્વં નમસ્કાર્યં નૃસિંહમાત્માનં નૌમ્યહં અહમિત્યત્ર પરમાત્માનં નમામ્યહં ઇતિ પદસ્થાનેષુ યોજનીયં એવમેવ યદોપાસ્તિ ॐ ઇં હં ઉગ્રં વીરં મહાવિષ્ણું નૃસિંહમાત્માનં નમામ્યહમ્ । એવં સર્વત્ર સમ્પુટિત મૂલમન્ત્રમુચ્ચાર્ય સ્વયમ્પ્રકાશં નૃસિંહમિતિમહોપાસ્તિઃ । એવમેવ દ્વાત્રિંશદ્વ્યૂહસહિતપદપાદમહોપાસનાનિ કુર્યાત્ ॥

અથ પુરશ્ચરણમન્ત્રાન્પઠેત્ ।
ॐ ઇં હં ॐ ઉં ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ બ્રહ્મા તસ્મૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ ગ્રં ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ વિષ્ણુસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ વીં ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ મહેશ્વરઃ તસ્મૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ રં ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચપુરુષસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ મં ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ શ્રેશ્વરસ્તસ્મૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ હાં ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યા ચ સરસ્વતી તસ્યૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ વીં ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યા ચ શ્રીસ્તસ્યૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ ॐ ષ્ણું ॐ ॐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યા ચ ગૌરી તસ્યૈ વૈ નમો નમઃ ।
ॐ ઇં હં ॐ જ્વં ॐ ॐ  યો વૈ શ્રીનૃસિંહો ભગવાન્ યા ચ પ્રકૃતિઃ તસ્યૈ વૈ નમો નમઃ ।

ૐ ઇં હં ૐ લં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યા ચ વિદ્યા તસ્યૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ તં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યક્ષોઙ્કારઃ તસ્મૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ સં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યાશ્ચતસ્ત્રોર્ધમાત્રા તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ વેં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યે ચ વેદાઃ સાઙ્ગાઃ સશાખાઃ સેતિહાસા તેભ્યો વૈ નમો નમઃ ।
ૐ ઇં હં ૐ તોં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યે ચ પઞ્ચાગ્નયઃ તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ ભું ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યાશ્ચ સપ્તવ્યાહૃતયઃ તાભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ ખં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યે ચાષ્ટૌ લોકપાલાસ્તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ નં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યે ચાષ્ટૌ વસવસ્તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ સિંઓં ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યે ચૈકાદશરુદ્રાસ્તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ એં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યે ચ દ્વાદશાદિત્યાસ્તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ મીં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યે ચાષ્ટૌ ગ્રહાસ્તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ ષં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યાનિ પઞ્ચભૂતાનિ તેભ્યઃ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ ણં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ કાલઃ તસ્મૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ મં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ મનુસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ દ્રં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ મૃત્યુસ્તમૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ મં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ યમસ્તસ્મૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ ત્યું ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યાન્તકસ્તમૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ મૃ ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ પ્રાણસ્તમૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ ત્યું ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ સૂર્યસ્તમૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ નં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ સોમસ્તમૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ માં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ વિરાટ્ તસ્મૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ મ્યં ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યશ્ચ જીવસ્તમૈ વૈ નમો નમઃ ।
ૐ ઇં હં ૐ હં ૐ ૐ યો વૈ શ્રીનૃસિંહો ભગવાન્ યચ્ચ સર્વં તસ્મૈ વૈ નમો નમઃ ।
એવમેવ પુરશ્ચરણ મન્ત્રઃ । એવમેવપદપાદમહોપાસનાનિ દ્વાત્રિંશદ્વ્યૂહસહિતાનિ ચ પૂર્વવત્ કુર્યાત્ ।

અથ માનસપૂજાં વિધાય પુનઃ પુષ્પાઞ્જલિમન્ત્રાન્પઠિત્વા મૂલેન પઞ્ચપુષ્પાઞ્જલિ પઞ્ચપૂજાં ચ કૃત્વા તતો મૂલમેકવારં ગીત્વા દ્વાત્રિંશદ્વારં જપ્ત્વા અઙ્ગમન્ત્રાણાં મૂલમન્ત્રદશાંશેન જપઃ કાર્યઃ પુનઃ મૂલમેકવારં ગીત્વા તતઃ પૂર્વં વાક્પ્રાણદેહબુદ્ધિધર્માધિકારતઃ જાગ્રત્સ્વપ્નસુષુપ્ત્યવસ્થાસુ મનસા કર્મણા વાચા યત્સ્મરન્તં યદુક્તં યત્કૃતં તત્સર્વં બ્રહ્માર્પણં ભવતુ સ્વાહા । મામદીયં ચ સર્વં અસ્મત્સ્વામિને સમ્યગર્પય ઇતિ બ્રહ્માર્પણં કૃત્વા પ્રાણાયામત્રયં કૃત્વા અગન્યાસ ઋષિઃ છન્દો દેવતા વિન્યસ્ય ધ્યાનશ્લોકં પઠિત્વા ઉપસંહારમુદ્રાં મૂલમન્ત્રે કૃત્વા ભદ્રં કર્ણેભિરિતિં સ્વસ્તિ ન ઇતિ ચ શાન્તિં પઠિત્વા શ્રીનૃસિંહપરો ભવેત્ ॥

તત્સદ્બ્રહ્માર્પણમસ્તુ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ । લિખિતં પ્રહ્લાદ દીક્ષિતેન્ ।

ઇતિ શ્રીનૃસિંહમન્ત્રઃ સમ્પૂર્ણઃ ।

Proofread by M K Barman

---

*Shri Nrisimhamantrah*

pdf was typeset on August 8, 2025

Please send corrections to *sanskrit@cheerful.com*